*शोध मंथन, 2017 ISSN: (P): 0976-5255, (e) : 2454-339X, Impact Factor 3.8942 (ICRJIFR)*
***UGC Aproved Journal No. 40908***

# मत्स्यपुराणस्य पर्यावरणदृष्ट्या विवेचनम्

**डॉ0 नरेन्द्रकुमारः**
सहायकाचार्यः (संस्कृत विभाग)
चौधरीचरणसिंहविश्वविद्यालय
मेरठे

**डॉ0 संतोषकुमारीः**
सहायकाचार्यः (संस्कृत विभाग)
चौधरीचरणसिंहविश्वविद्यालय
मेरठे

*अधुना पारिस्थितिकविज्ञानान्तर्गते पादपान् तेषां समीपस्थ वातावरणस्याध्ययनं क्रियते अर्थात् पर्यावरणे जैविकतत्त्वानां तथ्यानां प्रक्रियाणां घटितघटनानां अध्ययनं क्रियते। पर्यावरणं प्राकृतिकानां मानवनिर्मितानां तत्वानां समूहं वर्तते। इत्थं अनयोः अन्योन्याश्रयः सम्बन्धो वर्तते। प्रकृतौ संतुलनं स्थापयितुं तस्याः मुख्याङ्गभूता वृक्षाः न कर्त्तनीयाः। मत्स्यपुराणे कथितं–फलवतां वृक्षाणां कर्त्तनं न करणीयम्।[1] अत्र वृक्षकर्त्तकानां कृते देशकालानुरूपं दण्डविधानम्।[2] अत्र वृक्षाणां उपयोगिताः तेषामौषधधीयगुणाः तेषां संख्या बहुलतया प्राप्नोति।[3] मत्स्येपुराणे आगतानां वृक्षाणां संख्या दशाधिकाष्टशतां वर्तते। वृक्षाणां कृते उद्भिज्ज।[4] द्रुम[5] –महीरुह[6]–तरु[7]–वनस्पति[8]–स्थावर[9]–पादप[10]–शाखा[11]–विटप[12]–प्रभृतयः[13] बहवः पर्यायाः प्रयुक्ताः। उद्भिज्जपदस्य प्रयोगः द्विवार।[14] द्रुमस्य पञ्च–षष्टिवार[15] महीरूहो एकवार[16] तरोः पञ्चदशवार[17] वनस्पतेः दशवार[18] स्थावरस्य चतुर्वार[19] प्ररोहस्य द्विवार[23] प्रयोगं सञ्जातम्। वृक्षपदस्य प्रयोगः अष्टाधिकषष्टिवारमभवत्। एवं मत्स्यपुराणे एकोऽपि अध्यायः ईदृशो न वर्तते यस्मिन् वृक्षपदस्य नामसङ्कीर्तनं न स्यात्। वृक्षः सृष्टेः अनिवार्यः महत्वपूर्णांशः। स्थावरजङ्गमजीवानां प्राणधारणार्थं जीवनसंचालनार्थं वृक्षस्य योगदानं सुसिद्धमेव। पृथ्वी–वायोरापः सम्मिश्रत्वैव भौतिकवातावरणं सृज्यन्ते। मानवः जैविकवर्गस्य एकः घटकः। स्थलाकृतिक–जैवीय–जलवायु–मृदीयचतुर्विधानि कारणकाणि। निसर्गतः प्रत्येकपादपः अन्यपादपैः सह मिलित्वा एकं समुदाय निर्माणं करोति। अस्य समुदायस्य सर्वेषां सदस्यानां वातावरणेन सह सम्बन्धः भवति यं पर्यावरणस्य जैविककारकं मन्यते।[24]*

शोध पत्र का संक्षिप्त विवरण निम्न प्रकार है:

**डॉ0 नरेन्द्रकुमारः**
**डॉ0 संतोषकुमारीः**

मत्स्यपुराणस्य
पर्यावरणदृष्ट्या विवेचनम्

शोध मंथन,
दिस0 2017,
पेज सं0 171-176
Artcile No. 27 (SM 667)
http://
anubooks.com?page_id=581

**स्थलाकृतिककारकाणि त्रीणि–प्रथमं**

समुद्रतलात् स्थानस्योन्नता–समुद्रतलादुपर्युपरि गमनाद् तापमानः न्यूनः भवति, तदा अतिवृष्टिर्भवति, वनस्पतिनां सम्वृद्धिर्भवति। तापमानपरिवर्तनात् वनस्पतयः प्रभाविताः भवन्ति, तत्र समुत्पन्नानां पादपानां गुणेष्वपि परिवर्तनानि परिलक्ष्यन्ते[25] मत्स्यपुराणस्याष्टात्रिंशदाध्याये ययाति नन्दनवने पावनगन्धयुक्तान् वृक्षानवलोकयत्।[26] मत्स्यपुराणस्य त्रयोदशाधिकशतमाध्याये भूगोलवर्णनान्तर्गते हिमवान्–हेमकूट–गन्धमादनप्रभृतयः पर्वताः समुद्रतलादुपरि वर्तन्ते।[27] अत्र तापमानः अतिन्यूनः वृष्टयातिरेकाद् वृक्षबाहुल्यञ्च वर्तन्ते[28] अत्र स्थितेषु वृक्षेषु गुणबाहुल्यं सन्ति। एते सर्वे दिव्यौषधियुक्ताः।[29] अत्र निवासिनः जनाः स्वस्थाः निरोगिणः दीर्घजीविनश्च।[30]

**पर्वतमालायाः सूर्यवायुभ्यां दिशानिर्धारणम्–द्वितीयम्–**

पर्वतश्रेणिषु सूर्यवाय्वयोः दिशायाः प्रभावं परिलक्ष्यते। यदा पर्वते सूर्यप्रकाशः न्यूनः भवति तदा वनस्पतिनां प्रादुर्भावः स्वल्पः जातः। मत्स्यपुराणस्य हिमालयपर्वतस्याश्रमबिवरे सूर्यप्रकाशः न–

**''तमसा चातिनिविडं नाल्पमात्रं सुसंकटम्। न तत्र सूर्यस्तपति न विराजति चन्द्रमा।''**[31]

सूर्यतापाधिक्येन पृथिव्यां वृक्षाणां अभावः जातः। मत्स्यपुराणस्य चतुर्चत्वारिंशताध्याये वर्णनमायाति–

**निर्वृक्षा निस्तृणा भूमिर्हता धोरेण तेजसा।**[32]

पर्वतावनतस्थानेषु प्रकाशबाहुल्येन वनस्पतिनां सुवृद्धिर्भवति। मेरूपर्वते मन्दार–पारिजात–कल्पवृक्षाणां बाहुल्यं वर्तन्ते।[33] लीलावतीगिरेः सौवर्णामरपादपाः।[34] रुद्रलोके प्रलयकाले सूर्यप्रखरतापेनापि वटः नष्टं न भवति।[35] हिमालये ऐरावत्याः तीरे सूर्यप्रकाशाधिक्येन कदम्बवृक्षः समृद्ध आसीत्।[36] हिमालयस्य एकशिखरे सूर्यप्रकाशाधिक्येन वृक्षबाहुल्यं वर्तन्ते।[37]

**भूमितलम्–तृतीयम्**

यदा भूमिः असमतला भवति तदा मृदायाः अपरदन (कटान) आधिक्याद् उर्वरामृदा नष्टा भवति। वनस्पतीनां उत्पत्तिः क्षीणाः जाता–एतस्या उदाहरणं नोपलभ्यते। वृक्षसंवर्द्धनार्थं मत्स्यपुराणे वृक्षारोपणस्य विधिर्वर्णनमुपल्यते।[38] औषधियुक्तेन जलेन सिञ्चमाणे वृक्षर्वृद्धिर्भवति।[39]

**जैवीयकारकाणि**

पारिस्थितिक–संतुलनाभावे अकालः भवति। वाल्मीकेः जन्मान्तरणकथाप्रसङ्गे सङ्केतमायातम्– तदानीं अकालापतितम्। स बुभूक्षितः आसीत्। **अरण्येऽपि स कन्दमूलं प्राप्तुं असमर्थः आसीत्।** [40]

**1. पादपमृदयोः विद्यमानयोः सूक्ष्मजीवयोः पारस्परिकं प्रभावम्**

मृदायां भाविनः सूक्ष्मजीविनः पादपानां मित्राण्यपि शत्रवश्चापि। केचन् सूक्ष्मजीविनः पत्र–पुष्प–कन्दमूलफलानि शनैः शनैः खादित्वा नश्यन्ति, वृत्तमूलानां ग्रन्थिषु मित्राणि सूक्ष्मजीविनः भवन्ति ये पवनं पादपेषु प्रेषयन्ति। ईक्षुवंशवृक्षयोः वृत्तग्रन्थिनां सन्दर्भः साङ्केतिकरुपेण मत्स्यपुराणे दृश्यते। यथा–

**''ग्रथ्नन्ति पर्वाणि आवृत्तादिक्षुवेणुवत्।''**[41]

**2. देशविशेषस्य वनस्पति–जन्तवोः पारस्परिकं प्रभावम्**

मानवाः जन्तवश्च पादपानां फलानि खादित्वा बीजानि एकस्थानादपरस्थान–पर्यन्तं नीत्वा पादपानां विकासकार्येषु सहयोगं कुर्वन्ति। मत्स्यपुराणे वर्णितमस्ति **'तत्र मांसभक्षिणः जन्तवः फलाहारं कुर्वन्ति स्म।'**[42] एतत् विपरीतमिदं जीवजन्तवः पादपानां पत्राणि खादित्वा नश्यन्ति। केचन् कीटाः पक्षिणश्चापि

पादपानां विकसने–विस्तारे–पल्लवने सहयोगिनः भवन्ति। मत्स्यपुराणे चकोराः शतपत्राः मत्तकोकिलसारिका प्रभृतयः पुष्पितवृक्षादुड्डीय अन्यवृक्षेषु तिष्ठन्ति स्म।[43] हिमालयस्य अन्याश्रमे पुरूरवा वनप्रान्ते पक्षीः अवलोकयति।[44] विरूद्ध स्वभावयुक्तापि द्वेषरहितान् पशून् तत्रालभत्।

### 3. कस्मिंश्चित् स्थाने प्ररोहपादपेषु पारस्परिकं सम्बन्धम्

विविधपादपेषु पारस्परिकसम्बन्धं वर्तन्ते। विकासकार्ये परस्परं साहाय्यं कुर्वन्ति केचन पादपास्तु अपरेषां पादपानामवलम्ब्यैव संवर्द्धिताः भवन्ति। मत्स्यपुराणस्य विविधप्रसङ्गैर्ज्ञायते यत् वृक्षशाखाः लतावितानसंच्छन्नाः आसन्।[46] केचन पादपाः अन्येषां पादपानामवलम्ब्य संवर्द्धन्ते यथा–सेममटरप्रभृतयः। हिमालये कुत्रचित् पिप्लयः नागवल्ल्यश्च[47] कुत्रचित् कूष्माण्डानां अलाबूनां लताः विकसन्ति स्म। सेमलताभिः तत्स्थानं सुशोभितमासीत्।[19]

### जलवायुकारकाणि

जलवायु प्रभावयितुं सक्षमाः षडावयवाः–

### 1. तापः

सूर्यस्तु तापस्त्रोतः। तापस्य न्यूनाधिक्यजन्यप्रभावः मानव–जीव–पादपानां संरचनायां पतति। तापाधिक्येन वृक्षाः शुष्काः भवन्ति। मत्स्यपुराणे कार्तवीर्यः आदित्यतेजसा सर्वान् वृक्षान् अदयत्।[50] पादपानां संवर्द्धनार्थं फलदानार्थं विविधतापानां आवश्यकता वर्तन्ते। मत्स्यपुराणे बहवः संदर्भाः समुपलभ्यन्ते।

### 2. वृष्टिः

जलचक्रं वृष्ट्या निर्धारितम्। यत्र वृष्टिः अधिका भवति तत्र सघनवृक्षाः उत्पद्यन्ते। हिमालयपर्वतशिखरेषु प्रायः वृष्टिः भवति–

**तत्रास्ति चापर श्रृङ्ग यत्र तोयधना घनाः।**
**नित्यमेवाभिवर्षन्ति शिलाभिः शिखरं वरम्।।**[51]

तत्र वृक्षबाहुल्यम्–''**शाखिनां सफलाः फलाः।**''[52]

यत्र वृष्टिर्न भवति तत्र वृक्षवृद्धिः अवरूद्यते। यत्र कुत्रचित् वर्षाधिक्यं तापाधिक्यं तत्र वृक्षगुल्माः नामोल्लेखः–

**''द्रुमशैलमहावृष्टिं पयोदाः ससृजुर्यथा।''**[53]

मत्स्यपुराणस्याष्टादशाधिकशताध्याये पञ्चत्रिंशदधिकद्विशतवृक्षानां नामोल्लेखः।

### 3. वायुः

कुत्रचित् वायुवेगेन शाखाः न विकसन्ति। मत्स्यपुराणे ईदृशाः प्रसङ्ग प्राप्यन्ते–

**शरभानष्टपादांश्च आपः पवनमेव च।**[55]

### 4. वातावरणीयार्द्रताः

पवने ये जललवाः वाष्परुपे वसन्ति ते आर्द्रतां कुर्वन्ति। तापन्यूनत्वाद् वातावरणस्य जलवाष्पाह्यक्षमता क्षीण जाता अतएव शरदि वाष्पकणाः (ओसलवाः) वृद्धिं प्राप्नुवन्ति। मत्स्यपुराणे उल्लिखितमस्ति यत् तत्र वृक्षाः ऋतुयोगतः पुष्पफलयुक्तासन्–

**''सदा पुष्पफलं सर्वमर्जमृतुयोगतः।''**[56]

**5. वायुमण्डलीय गैसाः**

वैज्ञानिकमतानुसारेण पृथ्वीतलाद् पञ्चदश–किमी0–उपरि विद्यमाना वायुः वातावरणं गम्भीरतया प्रभावितं करोति। हाइड्रोजन–ऑक्सीजन–नाइट्रोजन चक्रे इमे गैसाः पादपान् प्रभावयन्ति।[56] मत्स्यपुराणे उल्लिखितमस्ति–

**वायुनाक्रम्यमाणासु द्रुमशाखासु चाश्रितः।[58]**

**6. प्रकाशः**

जीवजन्तवः पादपाश्च सूर्यप्रकाशेन निजजैविकप्रक्रियाः सम्पाद्यन्ते। अनेनैव प्रकाशेन पुष्पाणां विकसनं वृक्षाणां संवर्द्धनम् सम्भवन्ति। मत्स्यपुराणे प्राप्यते यत्–

**''सूर्याशुतापपरिवृद्धकदम्बवृक्षाः।''[59]**

मृदीयकारकान्यपि पर्यावरणस्य घटकानि भवन्ति। निष्कर्षतः इदं कथयितुं शक्यते यत् व्यासः महान् पर्यावरणविदः आसीत्। अद्य वैज्ञानिकाः पर्यावरणसंतुलनार्थं प्रयासरताः परन्तु आरभ्यादैव व्यासः मत्स्यपुराणे पर्यावरणं प्रति पूर्णतः सजगः। पर्यावरणीय अव्यवस्थायाः समाधातुं सः सक्षमो आसीत्।

**सन्दर्भः**

1. मत्स्यपुराणम्– फलदानां च वृक्षाणां छेदने जप्यमृक्शतम्। 227/35–36 91–94, पृ0 सं0 879
2. तदैव, वृक्षं तु सफलं छित्त्वा सुवर्णदण्डमर्हति। 227/94, पृ0 सं0 884
3. तदैव, देशकालानुरूपेण मूल्यं राजा ब्रुभादिषु। 227.94, वही 39.11 पृ0 सं0 127
4. तदैव, 1.32, 38.10
5. तदैव, 140.4, 150.35
6. तदैव, 153.141
7. तदैव, 39.11, 59.9
8. तदैव, 44.5–9 तक
9. तदैव, 11.57, 150.173
10. तदैव, 158.302
11. तदैव, 148.93
12. तदैव, 148.93/545
13. तदैव, 11.27
14. तदैव, 1.32, 38.10
15. तदैव, 140.4
16. तदैव, 153.149
17. तदैव, 39.11, 59.9
18. तदैव, 44.5–9
19. तदैव, 11.57, 150.173
20. तदैव, 154.302–303

21. तदैव, 148.93
22. तदैव, 148.93
23. तदैव, 11.27
24. पर्यावरणीय अध्ययन डॉ0 कुदेसिया वं डॉ0 सिसोदिया
25. तदैव
26. मत्स्यपुराणे 38.18
27. मत्स्यपुराणे 113.46–55
28. मत्स्यपुराणे 113.47–50–52–55
29. मत्स्यपुराणे तत्र दिव्यो महावृक्षः पनसः पत्रमासुरः। 113.50
30. तस्य पीत्वा फलरसं संजीवन्ति समायुतम्। 113.5, 62
31. मत्स्यपुराणे 119.4–5
32. मत्स्यपुराणेः 44.11
33. मत्स्यपुराणे 92.5, 113.47–50
34. मत्स्यपुराणे 92.26
35. मत्स्यपुराणे 106.12
36. मत्स्यपुराणे सूर्याशुतापपरिवृद्धकदम्बवृक्षाः। 116.25
37. मत्स्यपुराणे नित्यातप्तशिलाजालं सदाभ्रपरिवर्जितम्।

तस्याधस्ताद् वृक्षगणो दिशां भागे च पश्चिमे।। 119.02

38. मत्स्यपुराणे 59 अध्याय
39. तदैव, 59.4–6
40. तदैव, 100.11
41. तदैव, 149.30
42. तदैव, 119.64
43. मत्स्यपुराणे, पुष्पिताग्रा पुष्पिताग्रैश्च सम्पतन्ति महादुमाः। 161.67–68

रक्तपीतारूणास्तत्र पादपाग्रगताः खगाः।। 161.68

44. मत्स्यपुराणे, एतांश्चान्यांश्च सुबहून् पक्षिसङ्धान् मनोहरान्। 118.55 पृ0 सं0 387
45. मत्स्यपुराणे, एतानद्विव्ष्टान् मद्रेशो विरूद्धांश्चय परस्परम्–119.61

हिंसन्ति हि न चान्योन्यं हिंसकास्तु परस्परम्–119.63

क्रव्यादाः प्राणिनस्तत्र सर्वे क्षीरफलाशनाः–119.64

46. मत्स्यपुराणे, 161.49 दृष्टवान् पवर्ताग्रेषु नानापुष्पधरा लताः–161.66
47. मत्स्यपुराणे, प्रतानै पिप्पलीनां च नागवल्लयश्च भागशः–118.25
48. मत्स्यपुराणे, कूष्माण्डानां प्रतानैश्च अलाबूनां तथा क्वचित्–118.27

49. मत्स्यपुराणे, तथा क्षीरकशाकेन कालशाकेन चाप्यथ।
शिम्बीधान्यैस्तथा धान्यैः सर्वैर्निरवशेषतः।। 118.32, पृ0 सं0 1386

50. मत्स्यपुराणे, आविष्टा मम तेजोभिः शोषयिष्यन्ति स्थावरान्।
शुष्कान् भस्मीकरिष्यन्ति तेन तृप्तिर्नराधिप। 44.81, पृ0 सं0 143

51. तदैव, 119.71

52. तदैव, 119.72

53. तदैव, 135.57

54. तदैव, द्रुमषण्डैः—118.6

55. तदैव, 135.66

56. तदैव, 118.48 / पष्ठ 387

57. पर्यावरणीय अध्ययन डॉ0 कुदेसिया एवं सिसोदिया, रिसर्च इण्डिया पब्लिकेशन, गांधीनगर, मेरठ (1990–91)

58. मत्स्यपुराणम्—116.11 / 678 पृ0 सं0

59. तदैव, 116.25 / 381 पृ0 सं0

**ग्रन्थः—** मत्स्यमहापुराणम्—गीताप्रेस गोरखपुर, प्रथम संस्करणम् पृ0 सं0 2063।